# स्तोत्र रचना

---

## वन्दे देवीं सरस्वतीम्

वागीशा वरदायिनी मतिमतां जाड्यापहा भास्वरा
संगीतादिकलाविहारपदवीं उद्योतिनी शारदा ।
याशुद्धाशयहास्यवस्त्रवदना पूतात्मनां शर्मदा
सा नः पातु सरस्वती भगवती विश्वेशवंद्या सदा ॥
***

## अम्ब देवि

अम्ब देवि नमस्तुभ्यं वयं कल्याणकांक्षिणः ।
प्रसन्ना भव भव्याय वरदे विजयोऽस्तु ते ॥
***

## श्रीनारायणगुरु - द्वादशी

भक्तानां सविता विकासयति यः चेतांसि कारुण्यभाक् ।
आर्तानां चरितानि शोधयति यः चारित्र्यवान् शुद्धधीः ॥
दीनानां दुरितानि नाशयति यः पुण्यावतारो महान् ।
तं नारायणसद्गुरुं भज मनो निःश्रेयसः प्राप्तये ॥

ज्ञान आणि कर्म । योग तैसा धर्म ।
भक्तिचेही वर्म । साकार ते ॥१॥
तेजे आदित्य नारायण । भक्तकुमुदां जीवन ।
भयकृत् भयनाशन । नारायण ॥२॥
मंगलांचे निधान । संकटांचे निषूदन ।
निजानंदी मग्न । नारायण ॥३॥
की प्रत्यक्ष विरक्ती । विग्रहवती अनासक्ती ।
परमत्यागमूर्ती । नारायण ॥४॥
स्वदेहाची आस्था । वितळली सर्वथा ।
जयांची परमास्था । अन्नदानी ॥५॥
यज्ञ यात्रा चिंतन । हेचि नित्याचे जीवन ।
प्रणतक्लेशनाशन । नैमित्तिक ॥६॥
आचार हा धर्म । विचार की मर्म ।
उच्चार हेचि कर्म । सद्गुरूंचे ॥७॥
नितान्त साधी राहणी । वेदवादी विचारसरणी ।

शास्त्र जयांची वाणी । बोले सदा ॥८॥
सहवासे शांतवी । संभाषणे तोषवी ।
कृपावर्षावे पोषवी । भाग्यवल्ली ॥९॥
वेद बाळे बोलती । यज्ञ येरू सारती ।
पुण्य पापीही जोडती । त्यांची कृपा ॥१०॥
जयांचे सहज बोल । मंत्र मोलाचे मंगल ।
सावरती जाता तोल । पाइकांचा ॥११॥
कृपा कैसी ओपिती । कशा आपत्ती वारिती ।
अगम्य त्यांच्या पद्धती । विलक्षण ॥१२॥

***

## श्रीकनकादित्यस्तवः

वन्दे कनकादित्यं वन्दे परमेशम् ।
अरुणं मित्रं वन्दे वन्दे सवितारम् ।(धृ.)
जय भास्कर जय पूषन् जय जय जगदात्मन् ।
ध्वान्तं जहि विस्तारय सौख्यं सौभाग्यम् ॥
स्वीये कर्मणि सूर्य प्रेरय जगदखिलम् ।
व्याधिव्यूहं भंजय शशिबन्धो निखिलम् ॥
दिव्यं ज्योतिर्मूर्तं देवायनदीपम् । ध्यायेत् लोकालोकं ग्रहपतिमादित्यम् ।
तिलकं सुधियामर्कं विद्यानां तीर्थम् । यायात् शरणं भूत्यै देवं प्रत्यक्षम् ॥
गच्छसि खग वियदन्तं प्रत्यहमश्रान्तम् ।
सप्त वहन्ति रथे त्वां दिवि हरितो नित्यम् ।
उत्तरदिवमधितिष्ठन् तेजः संजनयन् ।
वर्षसि भुवि बहुशाखैः स्वर्ग्यं पावित्र्यम् ॥
सत्यमिवैकं चक्रं धरते तव वहनम् । धर्म्यमिवात्मसहायं दुर्गं यास्ययनम् ।
राघवधर्मयमादिप्रभृतीन् प्रति सततम् । अनुकरणार्हमिदं ते संजातं चरितम् ॥
उदिते मार्तण्ड त्वयि नित्यं घनसैन्यम् । धावं धावं यतते कर्तुं त्वां छन्नम् ।
क्षिप्रं खिन्नं दृष्ट्वा संख्ये त्वममित्रम् ।
धवलं तमपि विभाकर कुरुषे धन्यमिदम् ।
साक्षिन् जगदुद्भावन संजीवय जीवान् ।
भास्वन् धारय धीरान् संभावय भावान् ।
बुद्धिं बोधय धीमन् संशोधय चित्तम् । साधो साधय मननं दलयाऽहंकारम् ॥
आचार्यायोद्यमिनां गुरवे दूरदृशाम् । दुर्गाध्वगधुर्याय प्रणतिः साष्टाङ्गम् ।
अवंतसाय शुचीनां अर्यमणे द्युमणे । धर्मनिधान विवस्वन् अस्तु नमस्तुभ्यम् ॥
नीलं जलधरछत्रं गन्धवहव्यजनम् । बिभ्रद् वासवचापं चित्रं प्रावारमम् ।
तमसः प्रसरं छेत्तुं रजसो नियमयितुम् । सत्त्वं संस्थापयितुं रविरयतामुदयम् ॥
ऋषिभिर्बहुधा विविधैश्छन्दोभिर्गीतम् ।

धामनिधे तव निस्तुलमुज्ज्वलमाचरितम् ।
आविर्भूतं शर्मद वाचां माङ्गल्यम् । छन्दसि गायत्र्याख्ये साम प्रख्यातम् ॥
निवसतु मेधालोके तेजः सावित्रम् । विलसतु वाङ्मय-मंचे तत्त्सवितुस्तोत्रम् ।
निनदतु हृदयाकाशे सौरं श्रुतिसुभगम् ।
दिनकरपादस्पर्शाद् विकसतु हृत्कमलम् ॥
मानससरसि सदा मे हंसोऽयं रमताम् ।
तमसो भानुकरा मां ज्योतिःप्रणयन्ताम् ॥
तपनः पापं त्रिविधं प्रीतो मे हरताम् । उषसो भर्तुःसम्मुखमाशाः काशन्ताम् ॥
दीर्घमनामयमायुः सुनृतचारित्रम् । प्रज्ञा विपुला धैर्यं सत्ये कामित्वम् ।
स्थैर्यं प्रकृताचारे चित्तं चासक्तम् । तव करुणातः स्यान्मे भगवन् सर्वमिदम् ॥

## श्रीधन्वन्तरी स्तोत्र

शंखं चक्रं जलौकां दधदमृतघटं चारुदोर्भिः चतुर्भिः
सूक्ष्मस्वच्छातिहृद्यांशुकपरिविलसन् मौलिमंभोजनेत्रम् ।
कालांभादिदिज्विलांगं केटतटेवलसत् चारुीर्तोंराढ्यम्
वन्दे धन्वन्तरिं तं निखिलगदवनप्रौढदावाग्निलीलम् ॥
***

## आर्या गौरी -स्तव

आर्या सरस्वती गौरी धीधधान्नप्रदायिनी ।
भक्तार्तिनाशिनी भद्रा वन्दे तां जगदम्बिकाम् ॥

आर्या सरस्वती गौरी धान्यधीधनदायिनी ॥
भक्तांची संकटे नाशी जगन्मातेस त्या नमू ॥
***

***(Composed By: Vaidya Shriniwas P. Hirlekar)***